श्री दुर्गा चंद्रकळा स्तुतिः

श्री दुर्गा चंद्रकळा स्तुतिः

वेधोहरीश्वरस्तुत्यां विहर्त्रीं विंध्यभूधरे |
हरप्राणेश्वरीं वंदे हंत्रीं विबुधविद्विषां || 1 ||

अभ्यर्थनेन सरसीरुहसंभवस्य
त्यक्त्वोदिता भगवदक्षिपिधानलीलां |
विश्वेश्वरी विपदपाकरणे पुरस्तात्
माता ममास्तु मधुकैटभयोर्निहंत्री || 2 ||

प्राङ्निर्जरेषु निहतैर्निजशक्तिलेशैः
एकीभवद्भिरुदिताऽखिललोकगुप्त्यै |
संपन्नशस्त्रनिकरा च तदायुधस्थैः
माता ममास्तु महिषांतकरी पुरस्तात् || 3 ||

प्रालेयशैलतनया तनुकांतिसंपत्
कोशोदिता कुवलयच्छविचारुदेहा |
नारायणी नमदभीप्सितकल्पवल्ली
सुप्रीतिमावहतु शुंभनिशुंभहंत्री || 4 ||

विश्वेश्वरीति महिषांतकरीति यस्याः
नारायणीत्यपि च नामभिरंकितानि |
सूक्तानि पंकजभुवा च सुरर्षिभिश्च
दृष्टानि पावकमुखैश्च शिवां भजे तां || 5 ||

उत्पत्तिदैत्यहननस्तवनात्मकानि
संरक्षकाण्यखिलभूतहिताय यस्याः |
सूक्तान्यशेषनिगमांतविदः पठंति
तां विश्वमातरमजस्रमभिष्टवीमि || 6 ||

ये वैप्रचित्तपुनरुत्थितशुंभमुख्यैः
दुर्भिक्षघोरसमयेन च कारितासु |
आविष्कृतास्त्रिजगदार्तिषु रूपभेदाः
तैरंबिका समभिरक्षतु मां विपद्भ्यः || 7 ||

सूक्तं यदीयमरविंदभवादि दृष्टं
आवर्त्य देव्यनुपदं सुरथः समाधिः |
द्वावप्यवापतुरभीष्टमनन्यलभ्यं
तामादिदेवतरुणीं प्रणमामि मूर्ध्ना || 8 ||

माहिष्मतीतनुभवं च रुरुं च हंतुं
आविष्कृतैर्निजरसादवतारभेदैः |
अष्टादशाहतनवाहतकोटिसंख्यैः
अंबा सदा समभिरक्षतु मां विपद्भ्यः || 9 ||

एतच्चरित्रमखिलं लिखितं हि यस्याः
संपूजितं सदन एव निवेशितं वा |
दुर्गं च तारयति दुस्तरमप्यशेषं
श्रेयः प्रयच्छति च सर्वमुमां भजे तां || 10 ||

यत्पूजनस्तुतिनमस्कृतिभिर्भवंति
प्रीताः पितामहरमेशहरास्त्रयोऽपि |
तेषामपि स्वकगुणैर्ददती वपूंषि
तामीश्वरस्य तरुणीं शरणं प्रपद्ये || 11 ||

कांतारमध्यदृढलग्नतयाऽवसन्नाः
मग्नाश्च वारिधिजले रिपुभिश्च रुद्धाः |
यस्याः प्रपद्य चरणौ विपदस्तरंति
सा मे सदाऽस्तु हृदि सर्वजगत्सवित्री || 12 ||

बंधे वधे महति मृत्युभये प्रसक्ते
वित्तक्षये च विविधे य महोपतापे |
यत्पादपूजनमिह प्रतिकारमाहुः
सा मे समस्तजननी शरणं भवानी || 13 ||

बाणासुरप्रहितपन्नगबंधमोक्षः
तद्बाहुदर्पदलनादुषया च योगः |
प्राद्युम्निना द्रुतमलभ्यत यत्प्रसादात्
सा मे शिवा सकलमप्यशुभं क्षिणोतु || 14 ||

पापः पुलस्त्यतनयः पुनरुत्थितो मां
अद्यापि हर्तुमयमागत इत्युदीतं |
यत्सेवनेन भयमिंदिरयाऽवधूतं
तामादिदेवतरुणीं शरणं गतोऽस्मि || 15 ||

यद्ध्यानजं सुखमवाप्यमनंतपुण्यैः
साक्षात्तमच्युत परिग्रहमाश्ववापुः |
गोपांगनाः किल यदर्चनपुण्यमात्राः
सा मे सदा भगवती भवतु प्रसन्ना || 16 ||

रात्रिं प्रपद्य इति मंत्रविदः प्रपन्नान्
उद्बोध्य मृत्युवधिमन्यफलैः प्रलोभ्य |
बुद्ध्वा च तद्विमुखतां प्रतनं नयंतीं
आकाशमादिजननीं जगतां भजे तां || 17 ||

देशकालेषु दुष्टेषु दुर्गाचंद्रकलास्तुतिः |
संध्ययोरनुसंधेया सर्वापद्विनिवृत्तये || 18 ||

इति श्रीमदपय्यदीक्षितविरचिता दुर्गाचंद्रकळास्तुतिः ||